# Sitashtakam Ratnapanchakam 2

# સીતાષ્ટકમ્ રત્નપઞ્ચકમ્ ૨

## Document Information

Text title : Sitashtakam (Ratnapanchakam 1)

File name : sItAShTakam.itx

Category : devii, devI, sItA, aShTaka

Location : doc_devii

Author : Kalyanasevaka

Proofread by : Brahatha Mohan

Latest update : May 22, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 22, 2026

*sanskritdocuments.org*

# સીતાષ્ટકમ્ રત્નપઞ્ચકમ્ ૨

(રત્નપઞ્ચકે દ્વિતીયં રત્નમ્ ।)

સીતા સદા પ્રકૃતિરેવ પરાત્મશક્તિ-
ર્વાગીશ્વરી સકલવેદમયી પ્રપૂર્ણા ।
શ્રીરામચન્દ્રચરણે સતતં વિલીના
માયામયી નિખિલદેવમયી વરેણ્યા ॥ ૧॥

સત્યાઽમૃતા સંસૃતિબીજરૂપા
સાકારરૂપં સકલં દધાના ।
શ્રીરામસાન્નિધ્યવશાત્સ્વતન્ત્રા
જ્ઞેયા મનુષ્યેન્દ્રસુરાસુરૈશ્ચ ॥ ૨॥

મહામાયા સીતા નિખિલજગદુત્પાદનકરી
મહાલક્ષ્મીર્દેવી સકલફલદાત્રી ત્રિભુવને ।
ક્રિયાશક્તિઃ સાક્ષાદનવરતવિદ્યાનિધિપરા
નિમેષોન્મેષાત્સા ભુવનલયકર્ત્રી જનકજા ॥ ૩॥

નિત્યાનન્દા પરમસુખદા નિત્યતૃપ્તા પ્રસન્ના
પઞ્ચભ્રાન્તિપ્રણિરસનતશ્ચાત્મબોધપ્રદાત્રી ।
વિદ્યાવિદ્યાસકલભવભીભ્રાન્તિભેદપ્રહન્ત્રી
સર્વોત્કૃષ્ટા હૃદયકમલે જાનકી મે સદાઽસ્તિ ॥ ૪॥

ભદ્રા દુર્ગા જ્ઞાનવિજ્ઞાનરૂપા ॥

શાન્તા કાલી ભુક્તિમુક્તિપ્રદાત્રી ।
નિત્યા પૂર્ણા વિશ્વમાતાઽઽત્મવિદ્યા
લબ્ધા સીતા શારદા વેદમાતા ॥ ૫॥

તુરીયાતીતા મા પરમવરદા શ્રીશ્ચ ધનદા
વિધાત્રી સાવિત્રી સકલસુખદાત્રી હ્યભયદા ।

સકામાનાં ભીતિર્ન તુ ભવભયં સ્વાત્મસુખિનાં
સુસૌખ્યં ચિત્પૂર્ણં ભજતિ મનુજો માતૃકૃપયા ॥ ૬॥

વેદાન્તાર્થસ્વરૂપા પરમસમરસા વ્યાપિની જ્ઞપ્તિરૂપા
રુદ્રાદિત્યાદિરૂપાઽખિલવિધસુખદા મોક્ષદા જ્ઞાનગઙ્ગા ।
મુક્તાલઙ્કારયુક્તાઽભયવરદકરા સિદ્ધિદા રામપત્ની
પદ્માક્ષી પદ્મહસ્તામલતમવપુષી સન્તતં શં તનોતુ ॥ ૭॥

સીતા સિતા પ્રભવદા પ્રણવાત્મિકેયં
પ્રાણેશ્વરી પરતમા પરમાઽન્નપૂર્ણા ।
સૂર્યેન્દુશક્રશિવરામસુદેહધાત્રી
ચિચ્ચેતનામતિકલાસ્વસુખૈકદાત્રી ॥ ૮॥

કલ્યાણસેવકહૃદિસ્થસરસ્વતી યા
સીતા પ્રભા કમલજા ભગવત્પ્રિયા મા ।
વ્યક્તા સુવાક્સકલકામદુહા ચ ધેનુઃ
સર્વાન્સદા વિમલભક્તજનાન્પ્રપાતુ ॥ ૯॥

ઇતિ શ્રીસમર્થરામદાસ-કલ્યાણપદાન્વિત-
કલ્યાણસેવકપ્રણીત રત્નપઞ્ચકે દ્વિતીયં રત્નં સીતાઽષ્ટાકં સમ્પૂર્ણમ્ ।

-

Proofread by Brahatha Mohan

*Sitashtakam Ratnapanchakam 2*

pdf was typeset on May 22, 2026

Please send corrections to *sanskrit@cheerful.com*